# shrIgaNeshastotram

# श्रीगणेशस्तोत्रम्

## Document Information

Text title : gaNeshastotram from AdityapurANa

File name : gaNeshastotramAdityapurANa.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : Jonathan Wiener wiener78 at sbcglobal.net

Proofread by : Jonathan Wiener wiener78 at sbcglobal.net, NA

Description-comments : Path Pustakam 1934 Srinagar Kashmir Mercantile Press

Source : Adityapurana

Latest update : April 22, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# श्रीगणेशस्तोत्रम्

आदित्यपुराणान्तर्गतम्

श्रीगणेशाय नमः ।

सिन्दूरकुङ्कुमहुताशनविद्रुमार्क-
रक्ताब्जदाडिमनिभाय चतुर्भुजाय ।
हेरम्बभैरवगणेश्वरनायकाय
सर्वार्थसिद्धिफलदाय गणेश्वराय ॥ १॥

चिदचित्पदगम्भीरं गमागमपदोज्झितम् ।
गहनाकाशसङ्काशं वन्दे देवं गणेश्वरम् ॥ २॥

श्रीसनत्कुमार उवाच ।
शङ्कराद्ब्रह्मणा प्राप्तं पद्मयोनेर्मया प्रभोः ।
तदहं कीर्तयिष्यामि स्तोत्रं परमदुर्लभम् ॥ ३॥

षष्ठ्यां चतुर्थ्यामष्टम्यां चतुर्दश्यां विशेषतः ।
पूजयेच्च गणाध्यक्षं श्रद्धाभक्तिसमन्वितः ॥ ४॥

अर्घैः पुष्पैस्तथा धूपैर्दीपैर्माल्यैश्च चामरैः ।
वस्त्रैः कुण्डलकेयूरैर्मौलिभिश्च वितानकैः ॥ ५॥

भक्ष्यैर्भोज्यैरपूपैश्च मत्स्यैर्मांसैश्च मोदकैः ।
पानकैः फलमूलैश्च होमैर्मन्त्रादिभिस्तथा ॥ ६॥

गङ्गाह्रदे तु गाङ्गेयं श्रीशैले तु गणेश्वरम् ।
वाराणस्यां गजवक्त्रं गयायां टङ्कधारिणम् ॥ ७॥

प्रयागे तु गणाध्यक्षं केदारे विकटाननम् ।
लम्बोदरं कुरुक्षेत्रे नैमिषे च मदोत्कटम् ॥ ८॥

जम्बुकं दण्डकारण्ये लोकेशं हिमवद्गिरौ ।

विश्वक्सेनं तु विन्ध्याद्रौ मलये हेमकुम्भकम् ॥ ९॥

नायकं पुष्करद्वीपे विघ्नेशं शल्मले स्थितम् ।
इलावृते विश्वरूपं हरिवर्षे घटोदरम् ॥ १०॥

त्रिनेत्रं सिंहलद्वीपे श्वेतद्वीपे तु वामनम् ।
उज्जयिन्यां च लम्बोष्टं मालवे शूर्पकर्णकम् ॥ ११॥

सौराष्ट्रे वरदं देवं कश्मीरे भीमरूपिणम् ।
सिन्धुसागरयोर्मध्ये स्थितं वै मन्त्रनायकम् ॥ १२॥

हर्यक्षं यक्षभवने हरियक्षाभिधं विभुम् ।
पद्माभरणनामानं कैलासे परमेश्वरम् ॥ १३॥

महायोगं महेन्द्रे च सह्ये वाराहरूपिणम् ।
महोदरं च लुम्पायां चम्पायां शिखिवाहनम् ॥ १४॥

पाशहस्तं त्रिकूटे च पूजयेत्सर्वसिद्धिदम् ।
बलमग्निगुहायां च पाटले सिंहवाहनम् ॥ १५॥

पौण्ड्रे रौद्रमुखं चापि कलापिग्रामके जयम् ।
मेरुपृष्ठे कामरूपं नन्दनं नन्दने वने ॥ १६॥

विजयं वै गन्धवने देवदारुवने गणम् ।
आर्तानां विघ्नहरणं गङ्गासागरसङ्गमे ॥ १७॥

महापथे विरूपाक्षं चित्रकूटे मदोत्कटम् ।
दुर्जयं यमुनातीरे स्तम्भनं गन्धमाधने ॥ १८॥

भद्रवटे चाम्बरीशं मोहनं हस्तिनापुरे ।
किष्किन्दायामुग्रकेतुं लङ्कायां तु विभीषणम् ॥ १९॥

कलिङ्गे वरुणं चैव गान्धारे च मदोत्कटम् ।
अश्वत्थं च तुरुष्केषु चीने शत्रुजयावहम् ॥ २०॥

वज्रहस्तं कोसलेषु दाक्षिणात्येषु लोहितम् ।
शूलोद्धृतकरं चैव मध्यदेशे प्रकीर्तितम् ॥ २१॥

एकदंष्ट्रं पश्चिमाब्धौ पूर्वदेशे पराजितम् ।
उत्तरे चारुवक्त्रं च वरिष्ठं त्रिपुरेषु च ॥ २२॥

सुवर्णगर्भं विघ्नेशं नदीनां सङ्गमे स्थितम् ।
गिरिसन्धिषु विज्ञेयं हिरण्यकवचाभिधम् ॥ २३॥

सुमुखं नागरन्ध्रेषु नर्मदायां च षड्भुजम् ।
महापुरे महामायां भद्रकर्णे ह्रदे शिवम् ॥ २४॥

गोकर्णे गजकर्णं तु कान्यकुब्जे वराननम् ।
पद्मासनं कामरूपे श्रीमुखं सर्वतः स्थितम् ॥ २५॥

वेदवेदाङ्गशास्त्रेषु पूजयेद्ब्रह्मणस्पतिम् ।
अष्टाषष्टिस्तु नामानि स्तुतान्यद्भुतकर्मणः ॥ २६॥

नित्यं प्रभातकाले तु चिन्तयेद्गणनायकम् ।
एतत्स्तोत्रं पवित्रं च माङ्गल्यं पापनाशनम् ॥ २७॥

शस्त्र-खार्खोद-वेताल-यक्ष रक्षो भयापहम् ।
चौरारण्यभयव्याघ्रव्याधिदुर्भिक्षनाशनम् ॥ २८॥

कृत्यादिमायाशमनं सर्वशत्रुविमर्दनम् ।
त्रिकालं यः पठेद्भक्त्या स भवेत्सर्वसिद्धिभाक् ॥ २९॥

गणेश्वरप्रसादेन लभते शाङ्करं पदम् ॥ ३०॥

इति आदित्यपुराणे गणेशस्तोत्रं  सम्पूर्णम् ॥

Encoded and proofread by Jonathan Wiener wiener78 at sbcglobal.net

*shrIgaNeshastotram*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*